श्रीगणेशायनमः॥हरिः ॐ॥ततःकर्त्तोप्राङ्मुखउपविश्य॥आचम्यप्राणानायम्यदेश
कालौसंकीर्त्यअमुककर्मांगत्वेनामुककर्मैकर्तुशरीरशुध्यर्थंआत्मानंपावयिष्ये॥ए
कविंशतिकुशान्गृहीत्वा॥समभिर्मुखे॥समभिर्नासिकेसमभिर्लोटे॥ततःदक्षि
णसव्यपाणिभ्यामुदगग्रैसप्तकुशान्गृहीत्वा॥चित्पतिर्मापुनात्वच्छिद्रेणपवित्रेणवसोः
सूर्यस्यरश्मिभिः॥इतिनाभ्यांसोदकेदेभ्यमुखपर्यंतंसमार्ष्टि॥सकृन्मंत्रेणद्विस्त्रिर्वा॥अ
च्छिद्रोऽसनुचाकंजत्वा॥ॐयद्देवादेवहेडनं॥देवासश्चकृमावयं॥आदित्यास्तस्मान्मा
मुंचत॥ततस्त्वैनमामुत॥देवाजीवनकाम्यायत्॥वाचानृतमूदिम॥अग्निर्मानस्मादे
नसः॥गार्हपत्यःप्रमुंचतु॥दुरितायानिचक्रम॥करोतुमामेनसे॥ततेनद्यावापृथिवी॥

सतेनत्वꣳसरस्वति॥सतान्मासुंचताꣳहसः॥यदन्यकृतमारिम॥सजातशꣳसादुतवाजा
मिशꣳसात्॥ज्यायसःशꣳसादुतवाकनीयसः॥अनज्ञातंदेवकृतंयदेनः॥तस्मात्वमस्मा
ज्जातवेदोमुमुग्धि॥यद्वाचायन्मनसा॥बाहुभ्यामूरुभ्यामशीवद्र्यां॥शिभ्यैर्यदनृतंचकृमा
मावयं॥अग्निर्मातस्मादेनसः॥यत्स्रुत्याभ्यांचकरंकिल्बिषाणि॥अक्षाणांवग्नुमुपजिघ्र
मानः॥दूरेपश्याचराभृज्ञ॥तान्यप्सरसावनुदन्तामृणानि॥अदीव्यन्नृणंयदहंचकार॥
यद्वादास्यन्त्सेजगारोजनेभ्यः॥अग्निर्मातस्मादेनसः॥यन्मयिमातागर्भसति॥एनश्च
कारयसिता॥अग्निर्मातस्मादेनसः॥यदापिपेषमातरंपितरं॥पुत्रःप्रमुदितोधयन्॥अ
हिꣳसितोपितरौमयातनू॥तदग्नेऽअनृणोभवामि॥यदंतरिक्षंपृथिवीमुतद्यां॥यन्मातरं

पितरंवाजिहिꣳसिम॥अग्निर्मातस्मादेनसः॥यदाशसानिशसामयत्याशसा॥यदेनश्चकृमानू
तनंयसुरणं॥अग्निर्मातस्मादेनसः॥अतिक्रामामिदुरितंयदेनः॥जहामिरिप्रपरमेस
धस्थे॥यत्रयंतिसुकृतोनापिदुष्कृतः॥तमोरोहामिसुकृतांलोकं॥त्रितेदेवाअमृज
तैतदेनः॥त्रितएतन्मनुष्येषुमामृजे॥ततोमायदिकंचिदानशे॥अग्निर्मातस्मादेनस॥
गार्हपत्यप्रमुचनु॥दुरितायानिचक्रम॥करोतुमामनेनसं॥दिविजाताअमुजाताः॥
याजाताओषधीभ्यः॥अथोयाअग्निजाआपः॥तानःशुंधंतुशुंधनीः॥यदापोनक्तं
दुरितंचरामः॥यद्वादिवाचक्तनंयसुरणं॥हिरण्यवर्णास्तनउसुनीतनः॥इमंमेवरुणश्च
मीहवमद्याचमृळय॥तामवस्युराचके॥ततोयामित्रावरुणावंदमानःस्तदाशास्तियजमा

नाहविर्भिः॥ अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥ तंनोअग्नेवरुणस्य
विद्वान्देवस्यहेळोवयासिसीष्ठाः॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमु
ग्ध्यस्मत्॥ सत्वंनोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ॥ अवयक्ष्वनोवरुणं
रराणोवीहिमृळीकंसुहवोनएधि॥ त्वमग्नेअयास्ययासन्मनसाहितः॥ अयासंहव्य
मूतिषेयानोधेहिभेषजं॥ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः॥ सुरभिनोमुखा
करत्प्रणआयूंषितारिषत्॥ इतिमार्जनं॥ तास्यकान्याकरीत्॥ वाक्पतिर्मापुनातविष्
ट्टेणपवित्रेणवसोःसूर्यस्यरश्मिभिः॥ नाभ्याःसोदंदेवोनोसिकापर्यंतंसंमार्ष्टि॥ सक्रत्व
त्रिणद्विस्तूष्णीं॥ पवमानःसुवर्जनः॥ पवित्रेणविचर्षणिः॥ यःपोतासपुनातुमा॥ पुनंतुमादेव

जनाः॥ पुनंतुमनवोधिया॥ पुनंतुविश्वआयवः॥ जातवेदःपवित्रवत्॥ पवित्रेणपुनाहिमा॥
शुक्रेणदेवदीद्यत्॥ अग्नेक्रत्वाक्रतूंरनु॥ यत्तेपवित्रमर्चिषि॥ अग्नेविततमंतरा॥ ब्र
ह्मतेनपुनीमहे॥ उभाभ्यांदेवसवितः॥ पवित्रेणसवेनच॥ इदंब्रह्मपुनीमहे॥ वैश्वदेवीपुन
तीदेव्यागात्॥ यस्येहक्रीळन्त्युपवीतिनृम्णा॥ नयामदंतःसधमाद्येषु॥ वयंस्यामपतयो
रयीणां॥ वैश्वानरोरश्मिभिर्मापुनातु॥ वातःप्राणेनपुनेहिरोमयोभूः॥ द्यावापृथिवीपयसापय
स्वतीभिः॥ शतावरीयज्ञियेमापुनीतां॥ बृहद्भिःसविनस्तूभिः॥ वर्धिष्ठेदेवमन्मभिः॥ अग्नेदक्षैः
पुनाहिमा॥ पुनंतुमांदेवजनाः॥ पुनंतुयेनदेवाअपुनत॥ येनापोदिव्यंकशः॥ तेनदिव्येनब्रह्मणा॥
इदंब्रह्मपुनीमहे॥ यःपावमानीरध्येति॥ सर्पिभिःसंभृतंरसं॥ सर्वंसपूतमश्नाति॥ स्वदितंमा

२

पा॰पा
३

नरिश्वना। पावमानीर्योअध्येति।ऋषिभिःसंभृतंरसं।तस्मैसरस्वतीदुहे।क्षीरंसर्पिर्मधूदकं।पावमानीःस्वस्त्ययनीः।सुदुघाहिघृतश्चुतः।ऋषिभिःसंभृतोरसः।ब्राह्मणेष्वमृतंहितं।पावमानीर्दिशंतुनः।इमंलोकमथोअमुं।कामान्त्समर्धयंतुनः।देवीर्देवैःसमाभृताः।पावमानीःस्वस्त्ययनीः।सुदुघाहिघृतश्चुतः।ऋषिभिःसंभृतोरसः।ब्राह्मणेष्वमृतंहितं।येनदेवाःपवित्रेण।आत्मानंपुनतेसदा।तेनसहस्रधारेण।पावमान्यःपुनंतुमा।आजापत्यंपवित्रं।शतोद्यामंहिरण्मयं।तेनब्रह्मविदोवयं।पूतंब्रह्मपुनीमहे।इंदुःपवित्रंसहमा।पुनातुसोमःस्वस्त्यावरुणःसमीच्या।यमोराजाप्रमृणाभिःपुनातुमा।जातवेदोमोर्जयंत्याःपुनातुं।इतिजपित्वा।ऋषीहिशमयोभुवः।ऋक्१।इतिमार्जनं।तांस्यस्कान्याग्रहीत्वादेवोमासविता ३

पुनात्वच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिः।।नाभ्याःसोदकेर्दभैर्त्रलाटपर्यं।तंसंभाष्यसकृन्मंत्रेणहिंकृत्यं।तस्यतेपवित्रपतेपवित्रेणयस्मेकंपुनेतच्छकेयं।हिरण्यवर्णाःशुचयःपावकायासुजातःकश्यपोयास्विंद्रः।अग्निंयागर्भंदधिरेविरूपास्तान्नआपःशंस्योनाभवंतु।यासाःराजावरुणोयातिमध्येसत्यानृते।अवपश्यंजनानां।मधुश्चुतःशुचयोयाःपावकास्तान०।।यास्तेदेवाहिविरूपंनिभक्षंयान्नंतरिक्षेबहुधाभवंति।याःपृथिवींपयसोंदंतिभुञ्जास्तान०।शिवेनमाचक्ष्वमयिपशवेनापःशिवयातनुवस्पृशतत्वचंमे।सर्वांश्च्यौरुपदधेवोमयिवर्चोबलमोजोनिधत्त।इतिमार्जनं।तांस्यस्कान्याग्रहीत्वाओंभूर्भुवःस्व

रित्यपः प्राश्य॥ आपो हिष्ठेतितिस्रभिर्मुखंसंमृज्य॥ एभिर्मंत्रैर्णविषयेआचामेत्॥ तत्र प्र-
थोवः०॥ आपो०॥ पयस्वतीरोषधयःपयस्वद्वीरुधांपयः॥ अपांपयसोयत्सयस्तेनमा
मिंद्रंसृंसृज॥ निःषिंचेत्॥ उन्मृजेद्द्विः॥ देशन्यसुश्रुकाभ्यांसजलमभिमृशेन्नासिका
रंध्रयुग्मं॥ अंगुष्ठानामिकाभ्यांनयननयुग्मंकर्णयुग्मं॥ कनिष्ठांगुष्ठाभ्यांनाभिदेशं॥
हृदयंतलेन॥ अंगुलीभिःशिरोमुखे॥ स्मृत्युक्तमाचमनंकृत्वा॥ गायत्रीशतेवारंदा
वारमिहाजपः॥ इडादे०॥ अपनःशोशुचदघमग्नेशुशुग्ध्यारयिं॥ अपनः०॥ सुक्षेत्रि
सुगातुयावसूयाचयन्नामहे॥ अप०॥ प्रयङ्गंदिवोऽएषांप्रास्मासश्चस्रयः॥ अप०॥
प्रयदग्नेःसहस्वतोविश्वतोयंतिस्रयः॥ अप०॥ प्रयतेअग्नेसूरयोजायेमहिप्र



तोवयं॥ अपन०॥ त्वंहिश्वतोसुखविश्वतःपरिभूरसि॥ अपनः०॥ द्विषोनोविश्वतो
सुखानिनावेवपारय॥ अपनः०॥ सनःसिंधुमिवनावयातिपर्षास्वस्तये॥ अप०॥
आपःप्रवणादिवय तीरपास्मत्स्यंदतामघं॥ अपनः०॥ आनंदायप्रमोदायपुनरा
गांस्नानगृहान्॥ अपन०॥ नवैतन्नम्रियतेगौरश्वःपुरुषःपशुः॥ यत्रेदंब्रह्म
क्रियतेपरिधिर्जीवनायकमपनःशोशुचदघं॥ सहस्रशीर्षेत्यनुवाकंजप्त्वा॥

Digitized with financial assistance from the Government of Maharashtra on 11 June 2017

पद्मनंदी
५

इतिपद्मनंदिसम्पूर्णं।